International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2019; 4(2): 04-07
© 2019 Jyotish
www.jyotishajournal.com
Received: 04-05-2019
Accepted: 06-06-2019

**विजय प्रसाद रतूड़ी**
शोधच्छात्रः श्री लालबहादुरशास्त्री
राष्ट्रिय संस्कृत विद्यापीठम्,
नवदेहली, भारत

**Correspondence**
**विजय प्रसाद रतूड़ी**
शोधच्छात्रः श्री लालबहादुरशास्त्री
राष्ट्रिय संस्कृत विद्यापीठम्,
नवदेहली, भारत

# वास्तुशास्त्रदृष्ट्या भूमिसंशोधनम्

## विजय प्रसाद रतूड़ी

**प्रस्तावना**

अस्मिन् जगति सर्वे प्राणिनः सुखान्वेषणे तत्पराः सन्ति। परं च सुखस्य प्राप्तिः कथं भवति? अनेकानेक भारतीयाः महर्षयो मनीषिणश्च भिन्न–भिन्न मार्गान् दिग्दर्शनं कृतम्। कस्यापि प्राणिनः सुखस्य प्राप्तिः करोति तथापि कोऽपि मानवः दुःखस्य प्राप्तिः करोति। अतएव गृहादि निर्माणे यो विधिः वास्तुशास्त्रो अस्ति। तमनुसृत्य एव गृहनिर्माणं करणीयं तथा देवाः मानवाद्य यज्ञ निवासं कुर्वन्ति सः वास्तु इति निगद्यते। वास्तुशास्त्रास्य चत्वारो भेदाः सन्ति प्रथमं भूमिः, प्रासादः, यानं तथा शयनं च। एषु च प्राधानवस्तु भूमिः भवति। सम्पूर्ण जगति सर्व पदार्थाः अस्याः एव उत्पन्नाः भवन्ति। प्रासादादयः वास्तु प्रधान वास्तु जाताः यतोहि सर्वेषां पदार्थानाम् उत्पत्तिस्थानं रत्नगर्भा भूमिरस्ति। तथैव च आश्रिताः भवन्ति। अतः ते सर्वे वास्तुरूपेण परिलक्षितं भवति।

चतुर्षु वास्तुषु प्रथमतः प्रधानरूपेण वास्तुशास्त्रास्य विचारः कर्त्तव्यः। भवन, देवालय, कूप, बावड़ी कृते भूखण्डस्य चयनमावश्यकं भवति। भूखण्ड़स्य परीक्षणं विध्यनुसारं वर्ण–गन्ध–रसाकृति दिक्छब्दस्पर्शादिभिः कर्त्तव्यम्। भूपरीक्षणानन्तरं भूमे ग्रहणं च कुर्यात्।

वास्तुशास्त्रास्याभिप्रायः निवासोपयुक्तं स्थानम्भवति अयं शब्दः वस् निवासे धतुना सह तुण् प्रत्ययेन निष्पन्नो भवति। यत्र निवासो भवति तदेव वास्तुः।

**'वसन्ति प्राणिनो यत्रा'**

'वास्तुर्वसतेर्निवास कर्मणः[1]' सः वास्तु अथास्यैव 'वसनिवासे'[2] इत्यस्माद्धातोः 'वसेस्तुन वसेर्णिच्च[3]' इत्यनयोः सूत्रयोः 'वस्' धतौ 'तुन् प्रत्यये' कृते सति वास्तुशब्दो निष्पद्यते। अस्यानेक भेदाः भवन्ति। यथा गृहम्, ग्रामः, देवालयः तथा पुरादयश्च। भारतीयपरंपरायां चतुर्णां वेदानामपि चत्वारः उपवेदास्सन्ति। यथा – ऋग्वेदस्य आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्व वेदः अथर्ववेदस्य च स्थापत्यवेदः। स्थापत्यवेदस्याभिप्रायोऽपि निवासयोग्या स्थापना कर्त्तव्यम्।

अत एव ऋग्वेदस्यैकस्मिन् प्रसङ्गे वास्तोष्पत्तेः प्रार्थनायामेका ऋचा मिलति यथा –

**'वास्तोष्पत्ते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवानः यत् त्वेमहे प्रति तन्नो जुषस्व शंन्नो भवः द्विपदेः शं चतुष्पदे।[4]**

अस्मिन् मन्त्रेऽस्मिन् वास्तुदेवस्य प्रति कल्याणस्य प्रार्थना कृता। हे वास्तोष्पत्ते! अस्मान् प्रति जानीहि नः स्वावेशः अनमीवः भवः। यत् त्वा ईमहे तत् नः प्रति जुषस्व। न द्विपदे चतुष्पदे शं भवः।

हे वास्तोष्पते वयं भवतः उपासकाः। अत्रां वयं विश्वासं विधय वयं सर्वे जनाः रोगमुक्तान् करोतु। एवं च अस्माकमैश्वर्यादि प्रार्थनाः स्वीकरोतु।

अस्मिन् वास्तु स्थाने गृहनिवासिनामस्माकं गृहस्य परिवारस्य जनानां कल्याणं कुर्वन्ति।

'वेदोऽखिलो धर्ममूलम्' इति समुदघोषयता मनुना समग्रस्यापि वेदनिधेधर्माधर्मरूपेण प्रतिष्ठा विहिता। वेदेषु ज्ञानविज्ञानप्रभृतीनां जीवोपयोगि विषयाणां सम्यग्ज्ञानाय कृते शिक्षा – कल्प – व्याकरण – निरुक्त – छन्दो ज्योतिषाणां वेदार्घींनां जन्माभवत्।

> शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चयः।
> ज्योतिषामयनं चैव वेदार्घींनि षड़ेव तु।।[5]

वास्तुशास्त्रामपि ज्योतिषशास्त्रास्याङ्गं वर्तते। ज्योतिषशास्त्रास्य संहिता भागे वास्तुशास्त्रास्य वर्णनं मिलति। ज्योतिषशास्त्रास्य विचारणीयपक्षाणां दिग्देशकालानां कारणैरेव वास्तुशास्त्रास्य समावेशः ज्योतिषशास्त्रोभवत्।

मानवजीवनस्य विविध्पक्षाणां सूक्ष्मातिसूक्ष्मविचारः ज्योतिषशास्त्रो भवति। ज्योतिषशास्त्रं कालविधनशास्त्रामस्ति। कालस्यानन्तरन्दिशः ज्ञानं भवति। भूखण्डशोधनस्य कृते दिशिज्ञानमावश्यकं कर्तव्यं तथा कालस्य महत्त्वं प्रदर्श्य वास्तुशास्त्रो भगवान् विश्वकर्मणां लिखितं यत्–

आदौ कालं परीक्षेत् सर्वकार्यार्थसिद्धये।
कालो हि सर्वं जीवानां शुभाशुभफलप्रदः।।[6]
कालातिक्रमेण दोषो द्रव्यहानिश्च जायते।
देवानामपि देवीनां विप्रादीनां विशेषतः।।[7]
वक्ष्येऽहं दिक्परिच्छेदं शघङ्कनार्कोदये सति,
उत्तरायणमासे तु शुक्लपक्षे शुभोदये।
प्रशस्तपक्षनक्षत्रो विमले सूर्य मण्डले,
गृहीतवास्तुमध्ये तु समं कृत्वा भुवः स्थलम्।।[8]
प्रासादभवनारम्भे स्तम्भस्थापन कर्मणि।
द्वारस्थापनवेलायां भवनानां प्रवेशने।।[9]
कालं शुभं परीक्षेत मंगला वाप्ति साधकम।
देशभेदेन कालोऽपि भितां प्रतिपद्यते।।[10]
तस्मात्सर्वप्रयत्नेन शुभं कालं न लङ्घयेत्।[11]

वस्तुतः भूखण्ड़चयनस्य कृते दिघ्निर्धरणमापि महत्वपूर्णमस्ति। बिना दिङ्निर्धारणे सर्वेषां प्राणिनां हानि भवितुं शक्यते। तथा – भूखण्डस्य चयनं कालानुसारं शुभदिने पक्षे च कर्तव्यम् –

आदौ भूमिपरीक्षणं शुभदिने पश्चाच्च वास्त्वर्चनं
भूमेः शोधनकं ततोऽपि विधिवत् पाषाणतोयान्तकम्।
पश्चाद् वेश्मसुरालयादिरचनार्थं पाद स्थापनं
कार्यं लग्नशशशाङ्शाकुनबलैः श्रेष्ठे दिने धीमता।[12]

## भूखण्डस्य भेदा

वास्तुशास्त्रो चतुर्वर्णानुसारं भूखण्ड़स्य वर्णनं कृतम्। अनया दृष्टया भूमेर्भेद इयं वर्तते। गौणः अंगी च। भूमिः इति अङ्गी भवति। तथा ग्रामादयो भूखण्डः गौणान्तर्गता भवन्ति। अस्याः भूमेः सभागारः प्रपायम्, रङ्गमण्डपम्, शाला, मन्दिरं समावेशितं अस्ति। एते प्रासादाः यथावत् कथ्यन्ते। तथा –
शयनान्तर्गतं तु मंच मंचिलिका काष्ठासनानि पंचरम्, पफलकासनम् गृह्यन्ते। उपर्युक्त चतुर्ष्वपि वास्तुप्रकारेण भूखण्ड़स्य प्रथमं स्थानं कथ्यते। यदा पंचतत्त्वानां गणना क्रियते पंचतत्त्वेषु प्रथमं पृथ्वी एव गण्यते। पृथिवी सम्पूर्णं जगतस्याधररूपिणी अस्ति। अत एव भूखण्ड़स्य प्रथमं स्थानं वर्तते।

## भूखण्ड़स्य गुणवत्ता

यस्यां भूमेः प्रशस्तौषाधि – द्रुमलतायुताभूमिः मधुरा, स्निग्ध, सुरभिगन्धः, समतला एव परिश्रमस्य कृते प्रभावशालिनी भूमि सर्वेषां मानवानां कृते धनधन्यादिकं सुखं च प्रददाति।

शस्तौषधिद्रुमलता मधुरागन्ध,
स्निग्ध समानसुखदा च मही नराणाम्।
अप्यध्वनि श्रम विनोदमुपगतानां,
धत्ते श्रियं किमुत शाश्वत मन्दिरेषु।।[13]

## अष्टदिक्प्लवतानुसारं भूमिपरीक्षणम्

यदि पूर्वदिक्प्रवणा भूः स्यु। तथा धनस्य लाभ नैऋत्यकोणे, धनस्यहानिः, पश्चिमे, पुत्रस्य हानि वायव्ये, सतानिवासं उत्तरे प्रवणाभूः धनस्यलाभः, ईशाने विद्यालाभं, मध्यप्लवा भूमिः हानिं भवति।

श्रियं दाहं तथा मृत्यु धनहानिं सुतक्षयम्,
प्रवासं धनलाभं च विद्यालाभं क्रमेण च।
विदधत्यचिरेणैव पूर्वादिप्लवता मही,
मध्यप्लवा महीनेष्टा न शुभा प्लवतत्परा।।[14]
हानिं भवति।

| क्र.सं. | प्लवदिशा | पफलम् |
|---|---|---|
| 1 | पूर्वदिशि | श्रीवृद्धिः |
| 2 | आग्नेयदिशि दक्षिणपूर्वद्ध | दाहः |
| 3 | दक्षिणदिशि | मृत्युः |
| 4 | नैऋत्यदिशि दक्षिणपश्चिम | धनहानि |
| 5 | पश्चिमदिशि | पुत्रक्षयः |
| 6 | वायव्यदिशि उत्तरपश्चिम | प्रवासः |
| 7 | उत्तरदिशि | धनलाभः |
| 8 | ईशानदिशि उत्तरपूर्व | विद्यालाभः |

भूपरीक्षणस्य कृते वीथीं ज्ञानं महत्वपूर्णमस्ति। वीथी नवविध भवति। तस्याः नामानि क्रमशः –
1. गोवीथी, 2. यमवीथी, 3. जलवीथी, 4. गजवीथी, 5. भूतवीथी, 6. नागवीथी, 7. वैश्वानरीवीथी, 8. धनवीथी, 9. पितामहवीथी। मुख्यरूपेण अष्टप्रकारस्य वीथी भवन्ति।

## गोवीथीभूखण्ड

यदि भूमि पश्चिमदिक्षुः उच्चस्था भवति तथा पूर्वदिशायां नीचस्था अस्ति। सा भूमि गोवीथी कथ्यते। अस्मिन् प्रकारेण वीथीज्ञानम् करणीयम्।

वारूणोच्चसमायुता नीचमाहेन्द्र संयुता,
गोवीथीरिति सा ज्ञेया ऐन्द्रोच्चा नीचवारुणा।
जलवीथीरिति प्रोक्ता वास्तुज्ञान विशारदैः
सोमोच्चा यमनीचा च यमवीथीतिकथ्यते।।
यमोच्चसोमासनीचा च गजवीथीतिकथ्यते,
ईशोच्चं निर्ऋतिनीचं भूतलंवीथीकम्।
आग्नेयाच्चं वायुनीचं नागवीथी प्रशस्येत्।
वायुच्चमग्निनीचं यद् वीथीं वैश्वानरीं विदुः
नैऋत्यच्चमीशनीचं धनवीथीत्युदाहृतम्।।[15]

| क्र.सं | वीथी | दिशोच्चः उतदिशाः | दिशि अधः अवनतदिशा नीचः | फलम् |
|---|---|---|---|---|
| 1. | गोवीथी | पश्चिमः | पूर्वः | शुभम् |
| 2. | जलवीथी | पूर्वः | प्रतीच्यैः | अशुभम् |
| 3. | यमवीथी | उत्तरः | दक्षिणः | अशुभम् |
| 4. | गजवीथी | उत्तरः | दक्षिणः | शुभम् |
| 5. | भूतवीथी | ईशानः उत्तर–पूर्व | नैऋत्यः दक्षिण–पश्चिम | अशुभम् |
| 6. | नागवीथी | आग्नेयः दक्षिण–पूर्व | वायव्यः उत्तर–पश्चिम | अशुभम् |
| 7. | वैश्वानरवीथी | वायव्यः उत्तर–पश्चिम | आग्नेयः दक्षिण–पूर्व | शुभम् |
| 8. | धनवीथी | नैऋत्यः दक्षिण–पश्चिम | ईशानः उत्तर–पूर्व | शुभम् |

## गजकूर्मपृष्ठादि लक्षणेन भूशोधनम्

गजपृष्ठादि भेदेन भूचतुर्णां प्रकारस्य भवन्ति। क्रमशः गजपृष्ठभूखण्डः कूर्मपृष्ठभूखण्डः, दैत्यपृष्ठभूखण्डः, नागपृष्ठभूखण्डः भवन्ति।

## गजपृष्ठभूमिः

सर्वेषां मानवानां कृते गजपृष्ठभूमिः सर्वथा निवास योग्या भवति। या भूमिः दक्षिणे, पश्चिमे, नैऋत्ये, वायव्ये च समुन्नता स्यात् सैव

गजपृष्ठभूमिः भवति। तत्रा अस्मिन् भूमे निवासेन धन्यधान्यादीनामायुषश्च वृद्धिर्भवति –

दक्षिणेपश्चिमे चैव नैऋत्ये वायुकोणके।
एभिरुच्चा यदा भूमिर्जगपृष्ठाभिधीयते।।
गजपृष्ठेभवेद्वास स लक्ष्मीधनपूरितः।
आयुवृद्धिः करो नित्यं जायते नात्रा संशयः।।[16]

**कूर्मपृष्ठभूमि**

कूर्मपृष्ठभूमिश्च प्रशस्ता निवासयोग्या भवति। विशेषरूपेण मध्यभागे समुन्नता भूमिः चतुर्ष्वपि दिक्षु अवनता भूमिः कूर्मपृष्ठभूमिः भवति। एषाः भूमिः सर्वेषां मानवानां कृते निवासयोग्या भवति। अस्मिन् कूर्मपृष्ठलक्षणयुतायां भूमौ निवासेन प्रतिदिनं उत्साहस्य धनधान्यास्याभिवृद्धिः भवति।

मध्येऽत्युच्च भवेद्यत्रा नीचं चैव चतुर्दिशम्,
कूर्मपृष्ठाभवेद् भूमिस्तत्रावासो विधीयते।
कूर्मपृष्ठेभवेद्वासो नित्योत्साहसुखप्रदः,
धनधान्यं भवेत्तस्य निश्चितं विपुलं धनम्।।[17]

**नागपृष्ठभूमि**

या भूमिः पूर्व पश्चिमयोः दीर्घा तथा दक्षिणोत्तरयोः समुन्नता भूमिः नागपृष्ठेति भवति। नागपृष्ठभूमे निवासकृते गृहपतेः मृत्युर्भवति। स्त्री हानिश्च जायते। पदे–पदे शत्राुभयमपि भवति।

पूर्वपश्चिमयोर्दीर्घो दक्षिणोत्तर उच्चकः,
नागपृष्ठं विजानीयात् कर्तुरुच्चाटनं भवेत्।
नागपृष्ठो यदावासो मृत्युरेव न संशयः,
पत्नीहानिः पुत्राहानिः शत्राुवृद्धिः पदे पदे।।[18]

**दैत्यपृष्ठभूमि**

या भूमिः पूर्वैशानाग्नेयोच्चा तथा पश्चिमनीचाभूमिः दैत्यपृष्ठेति निगद्यते। अस्यां भूमौ निवासेन लक्षयनुग्रह न भवति। धनसुत पशुनाश्च भवति अस्या भूमौ निवासं न कर्त्तव्यम्।

पूर्वाग्नि शम्भुकोणेषु उन्नतिश्च यदा भवेत्,
पश्चिमे च यदा नीचं दैत्यपृष्ठोऽभिधीयते।
दैत्यपृष्ठेभवद्वासो लक्ष्मीर्नायाति मन्दिरे,
धनपुत्रापशुनां च हानिरेव न संशयः।।[19]

| क्र.सं. | भूमिसंज्ञा | दिशोतम् | दिशोवनतम् | फलम् |
|---|---|---|---|---|
| 1. | गजपृष्ठ भूमिः | दक्षिणः, पश्चिमः, नैऋत्यः, वायव्य | | धन प्राप्तिः तथा आयु वृद्धिः |
| 2. | कूर्मपृष्ठभूमिः | भूमि मध्यः | | उत्साह धनधान्य वृद्धिः |
| 3. | दैत्यपृष्ठभूमिः | पूर्वे, आग्नेयः, ईशान दिशि | पश्चिमदिशि | धन, पशु एवं पुत्राश्च हानि |
| 4. | नागपृष्ठभूमिः | पूर्व, पश्चिम दिशि उत्तर–दक्षिण | मध्यः | उच्चाटनं, मृत्युभयः, शत्राुवृद्धिः, स्त्रीपुत्राादि हानिं |

**खातविधिनुसारं भूपरीक्षणम्**

भूखण्डस्य चयनं कृत्वा तस्याः परीक्षणं अवश्यमेव करणीयम्। परीक्षणस्य च अनेकाः विधाः सन्ति। भूम परीक्षणं शोभने दिवसे एव कर्तव्यम्। यद् रविवासरे भौमवासरे च कस्यापि वास्तुकार्यस्य या भूशोधनस्य कार्यः न कर्तव्यम्। शुभमुहुर्तानुसार परीक्षणदिवसे व्रतं कुर्यात्। तत्पश्चात् भूखण्डस्य मध्ये ब्राह्मणैः पूजनं कृत्वा भूखण्डस्य परीक्षणं कर्तव्यम्।

**मृत्तिका द्वारा भूपरीक्षणम्**

सर्वप्रथमं भूखण्डस्य मध्ये एकहस्तप्रमाणस्य गर्तं खनेत्। तस्मात् गर्तान्तिः सारितां मृत्तिकां पुनस्तस्मिन्नवगर्तं प्रपूर्येत्। यदि मृत्तिका स्वल्पा भवेत्तदा ज्ञातव्यं यद सा निवासयोग्या भूमिर्नास्ति। इयं भूमिरधमा अस्ति। यदि गर्तः पूर्येत् तथा मृत्तिका अवशिष्य स्यात् तदा सा भूखण्डः उत्तमाः कथ्यते।

निखनेद हस्तमात्रोण पुनस्तेनैव पूरयेत्।
पांसुनाधिकमध्योना श्रेष्ठा मध्याध्मा क्रमात्।।[20]

**जलद्वारा भूपरीक्षणम्**

यदि भूखण्डे एकहस्तपरिमाणं गर्तं खनेत् तस्मिन् गर्ते जलं प्रपूर्य पूर्वाभिमुखं शतपदं गच्छेत्। पुनः निवर्त्य आगते सति यदि जलं तावदेव स्यात् तदा सा भूमिः उत्तमाः भवति। सा भूमिः सर्वकामिकी भवति। यदि तस्मिन् गर्तं जलं स्वल्पं शिष्येत् तदा सा भूखण्डः मध्यमा कथ्यते। यदि तस्मिन् गर्ते जलमतीवाल्पं स्यात् सा भूमिरधमा भवति। तस्मिन् भूमौ निवासो न कर्त्तव्यः।

जलेनापूर्येच्छ्रभ्रं शीघ्रं गत्वा पदैः शतम्।
तथैवागम्य वीक्षते न हीन सलिला शुभाः।।[21]

**दीपेन भूपरीक्षणम्**

भूमेः श्वस्रं उपलिप्य तत्रा आममृत्तिकायाः प्रदीपे घृतं प्रपूर्य चतस्र वर्तिकाः चतुर्दिशोऽभिमुखं कृत्वा प्रज्ज्वाल्येत् पश्येच्च यत् कस्याः दिशिः वर्तिका अध्कि प्रकाशिता अस्ति। यस्याः दिशः वर्तिका अधिका प्रकाशिता स्यात्। सा भूमि ब्राह्मणवर्णस्य कृते शुभा भवति। सा वास्तुयोग्याः भूमिः भवति। तस्मिन् भूमौ पूर्वस्यां दिशि ब्राह्मणी, दक्षिणायां दिशि क्षत्रिाया, पश्चिमस्यां दिशि वैस्या, उत्तरस्यादिशि शूद्राणांकृते निवासयोग्या भूमिः वर्तते।

अरत्निमात्रो श्वभ्रे वा ह्यनुलिप्ते च सर्वतः,
घृतमामं शरावस्थं कृत्वा वर्तिचतुष्टयम्।
ज्वालयेद् भूपरीक्षार्थं सम्पूर्णं सर्वदिङ्मुखम्
दीप्ता पूर्वादि गृह्ण्याद् वर्णानामनुपूर्वशः।।[22]

**बीजद्वारा भूशोधनम्**

यदि भूमेः त्रिषु रात्रिषु बीजान्युघ्कुरितानि स्युः। सा भूमिस्तु श्रेष्ठा भवति यदि भूमेः पंचरात्रिषु अघ्कुरितेषु स्यात् सा भूमिः मध्यमाः भवति। यदि भूखण्डे सप्तरात्रिषु अघ्कुरितेषु भूमिः अधमाः भवति तथा तिलादिषु सर्षपादिषु वा उप्तेषु यावत्यां भूमौ बीजानि अघ्कुरितानि न भवेयुः सा भूमिः निवासयोग्या न भवति सा त्याज्यो भूमिः भवति।

हलाकृष्टे तथोद्देशे सर्वबीजानि वापयेत्,
त्रिपचसप्त रात्रोण न प्ररोहन्ति तान्यपि।
उप्तबीजा त्रिारात्रोण सांकुरा शोभना मही,
मध्यमा पंचरात्रोण सप्तरात्रोण निन्दिता।।[23]

**पुष्पद्वारा भूशोधनम्**

तस्मिन् वा धरयेच्छवभ्रे चित्रां माल्यमनुक्रमात्।
यच्चिरान्म्लायते माल्यं तदवर्णं तत्रा चावसेत्।।
स्वभ्रोषितं न कुसुमं यस्य प्रम्लायतेनुवर्णसमम्।
तत्तस्य भवति शुभदं, यस्य च यस्मिन् मनो रमते।।[24]

**शल्यद्वारा भूपरीक्षणम्**

शल्यस्य द्वारा भूपरीक्षणम् अवश्यमैव करणीयम्। यदि गृहस्वामी देवतायाः वृक्षस्य पफलस्य वा नामोच्चाराय कथितः यं शब्द वदेत्

यदि अक्षरं यस्मिन् कोष्ठके भवति तदा तस्मिन् भूमौ तत्रौव दिशि शल्यं कथयति।

प्रश्नत्रायं वापि गृहाध्पितेन,
देवस्य वृक्षस्य पफलस्य चापि।
वाच्यं हि कोष्ठाक्षर संस्थितेन,
शल्यं विलोक्यं भवनेषु सृष्ट्या।।[25]

यदि क्रमशः गृहस्वामी अ–क–च–ट–ए–त–श–प–य वर्गाः कथयति तथा प्रश्नस्याक्षर यस्याः कोष्ठके भवति। ये अक्षराः पूर्वादिदिक्षुः भवन्ति। एषु स्थितेषु भूखण्डस्य शोध्नं अवश्यमेव करणीयम्।

| प–फ–ब–भ–म ईशानः | अ,ई,उ,,लृ पूर्वः | क,ख,ग,घ,घ आग्नेयः |
|---|---|---|
| श,ष,स,ह उत्तरः | य,र,ल,व मध्यः | च,छ,ज,झ,ञ दक्षिणः |
| त,थ,द,ध,न वायव्यः | ए,ऐ,ओ,औ पश्चिमः | ट,ठ,ड़,ढ़,ण नैऋति |

आ का चा टा ए शा पा य वर्गाः,
प्राच्यादिस्थे कोष्ठके शल्यमुक्तम्।
केशाङ्गारा काष्ठलौहस्थिकाद्यं,
तस्मात्कार्यं शोधनं भूमिकायाः।।[26]

**वर्णानुसारं भूशोधनम्**

वर्णेन भूपरीक्षणं करणीयम् कस्य वर्णस्य कृते कीदृशी भूमिः श्रेष्ठं भवति। ब्राह्मणादिवर्णानां क्रमशः श्वेतः–रक्तः–पीतः–कृष्णवर्णा भूमिः शुभा एवं सर्वकामिनी सर्वपफलप्रदा च भवति। श्वेतमृत्तिकासंयुता भूमिः ब्राह्मणां कृते शुभा। रक्तवर्णा भूमिः क्षत्रियेभ्यः शुभाः, पीतमृत्तिका भूखण्डः वैश्येभ्यः कृष्णमृत्तिका भूमिः शूद्रेभ्यश्च सुखप्रदायकः भवति। तथा

सुगन्ध भूमिः ब्राह्मणानांकृते शुभा भवति। रक्तगन्धभूमिः क्षत्रियेभ्यः मधुगन्धभूखण्डः वैश्यानांकृते प्रशस्ता भवति मदिरागन्ध भूमिः शूद्रेभ्योः सुखप्रदायका भवति। तथा मधुस्वादयुक्ताभूमिः ब्राह्मणानांकृते कषायस्वादमृत्तिकाभूमि क्षत्रियेभ्यः अम्लस्वादयुक्ता भूमिः वैश्येभ्यः, तिक्तस्वादयुक्ता भूमिः शूद्राणांकृते शुभाभवति।

श्वेता रक्ता तथा पीता कृष्णवर्णानुपूर्वतः,
सुगन्ध ब्राह्मणी भूमि रक्तगन्ध तु क्षत्रिया।।
मधुगन्ध भवेद वैश्या मद्यगन्ध च शूद्रिका
मधुरा ब्राह्मणी भूमिः कषाया क्षत्रिया मता,
अम्ला वैश्या भवेद् भूमितिक्ता शूद्रा प्रकीर्तिता।।[27]

अन्य प्रकारेण चतुर्वर्णानांकृते भूशोध्नम् कुशयुत्ता भूमिः ब्राह्मणां कृते सुखप्रदायकाः भवति। सकुशयुक्ता भूमिः वैश्येभ्यः लाभप्रदायकः भवति। अत एव विधिनुसारम् भूशोधनस्य ज्ञानम् आवश्यं करणीयम्।

| क्र. सं. | वर्णः | भूखण्डस्य रसः | भूखण्डस्य गन्धः | भूखण्डेन संयुक्ति | भूखण्डस्य वर्णः |
|---|---|---|---|---|---|
| 1. | ब्राह्मणः | मधुरः | घृतः | दर्भः | श्वेतः |
| 2. | क्षत्रियः | कषायः | रक्तः | शरपतः | रक्तः |
| 3. | वैश्यः | अम्लः | अङ्गः | दूर्वः | पीतः |
| 4. | शूद्रः | कटुः | मद्यः | कासः | कृष्णः |

**उपसंहारः**

अस्मिन् वास्तुशास्त्राान्तर्गत सर्वेषां मानवानां कृते सुखस्य प्राप्तिः तथा दुखस्य निवृत्ति हेतवे तथा पंचतत्त्वान्तर्गत भूतत्त्वस्य भूखण्डस्यद्ध अनेकानेक विध्यनुसारं भूशोध्नस्य कार्यं करणीयम्। अतएव शास्त्राज्ञायाश्चानुसरणं सततमेव कर्तव्यम्। येन दुःखस्य हानिः तथा सुखस्य च प्राप्तिः स्यात्।

**संदर्भ ग्रन्था**

1. निरुक्त 10/2/16
2. भ्वादिगणे परस्मैपदी, सिद्धान्तकौमुद्याम्
3. उणादिप्रकरणे सूत्र 75/657
4. ऋग्वेद 4
5. पाणिनीय शिक्षा
6. वि. क. वास्तुशास्त्राम् अ. 3, 1–2
7. वि. क. वास्तुशास्त्राम् अ. 3, 2
8. मयमतम्
9. वि. क. वास्तुशास्त्राम्, अ. 3, श्लो. 3
10. वि. क. वास्तुशास्त्राम्, अ. 3, श्लो. 5
11. वि. क. वास्तुशास्त्राम्, अ. 3, श्लो. 6
12. वास्तुराजवल्लभः 11/14
13. वृहत्संहिता . संहिता वा. विधध्याय श्लो. 88
14. वृ. वा. माला, श्लो. 35–36, पृ. 20
15. वास्तुविद्या अ. 2, श्लो. 3–8, पृ. सं. 22–23
16. वृ. वा. मा. श्लो. 82–83, पृ. 19
17. वृ. वा. मा. श्लो. 84–85, पृ. 19
18. वृ. वा. मा. श्लो. 88–89, पृ. 20
19. वृ. वा. मा. श्लो. 86–87, पृ. 20
20. वि.कर्म.प्र. अ.1, श्लो. 62, पृ. 94
21. वि.कर्म.प्र. अ.1, श्लो. 63, पृ. 94
22. वि.कर्म.प्र. अ.1, श्लो. 64–65, पृ. 94
23. वि.कर्म.प्र. अ.1, श्लो. 66–67, पृ. 95
24. वृ.संहिता अ.52, श्लो. 93
25. राजवल्लभ वा. शा. श्लो. 19, पृ. 183
26. राजवल्लभ वा. शा., अ. श्लो.
27. वि.क.प. अ. 1, श्लो. 24–26, पृ. 6